**त्रिकालदर्शिन्** पु॰ त्रिकालं तद्वर्त्तिवस्तु पश्यति दृश–णिनि। १ऋषौ हारा॰। २त्रिकालज्ञे त्रि॰ "प्रध्वंसिन्यपि काले त्रिकालदर्शी कर्त्ता भवति" वृ॰ स॰ २१ अ॰।

**त्रिकूट** पु॰ त्रीणि कूटानि शृङ्गाण्यस्य। लवणसमुद्रमध्यस्थे लङ्कापुराधारे पर्वतभेदे अमरः। "तेरुहे केशरिक्रान्त-त्रिकूटशिखरोपमा" माघः "स सागरमनाधृष्यमतिक्रम्य महाबलः। त्रिकूटस्य तटे लङ्कां स्थितः स्वस्थो ददर्श ह" रामा॰सु॰२अ॰। स आकरत्वेनास्त्यस्य अच्। २तद्भवे सामुद्रलवणे न॰। ३सुमेरुसुते क्षीरोदसमुद्रतीरस्थे पर्वते च तत्कथा वामनपु॰ "सर्वरत्नमयः श्रीमान् त्रिकूटो नाम पर्वतः। सुतः पर्वतराजस्य सुमेरोर्भास्करद्युतेः। क्षीरोदजलवीच्या यो धौतामलशिलातलः। उत्थितः सागरं भित्त्वा देवर्षिगणसेवितः" इत्युपक्रमे "तस्यैकं काञ्चनं शृङ्गं सेवते यद्दिवाकरः। नानापुष्पसमायुक्तं नानागन्धाधिवासितम्। द्वितीयं राजतं शृङ्गं सेवते यन्निशाकरः। पाण्डुराम्बुदसंकाशं तुषारचयसन्निभम्। वज्रेन्द्रनीलवैदूर्य्यतेजोभिर्भासयन् दिशः। तृतीयं ब्रह्मसदनं प्रकृष्टं शृङ्गमुत्तमम्। न तत् कृतघ्नाः पश्यन्ति न नृशंसा न नास्तिकाः। नातप्ततपसो लोका ये च पापकृतो जनाः। तस्य सानुमतः पृष्ठे सरः काञ्चनपङ्कजम्। कारण्डवसमाकीर्णं राजहंसोपशोभितम्। गजोह्यचलसंकाशो मदाञ्चितलोचनः। तृषितः पातुकामोऽसाववतीर्णश्च तज्जलम्। संलीनः पङ्कजवने यूथमध्यगतश्चरन्। गृहीतस्तेन रौद्रेण ग्राहेणाव्यक्तमूर्त्तिना। गरुडस्थो जगन्नाथो लोकाधारस्तपोधन!। ग्राहग्रस्तं गजेन्द्रं तं तञ्च ग्राहं जलाशयात्। उज्जहाराप्रमेयात्मा तरसा मधुसूदनः। स्थलस्थं दारयामास ग्राहं चक्रेण माधवः। मोक्षयामास नागेन्द्रं पाशेभ्यः शरणागतम्"।

**त्रिकूटलवण** न॰ त्रिकूटं सामुद्रमिव लवणम्। द्रोणीलवणे राजनि॰।

**त्रिकूटवत्** पु॰ त्रीणि कूटानि सन्त्यस्य मतुप् मस्य वः। १त्रिकूटपर्वते। "हिमवान् पारियात्रश्च सह्यः शुक्तिमांस्त्रिकूटवान्" भा॰ आश्वमेधिकप॰ श्रेष्ठपर्वतकथने" ४२ अ॰।

**त्रिकूटा** स्त्री भैरवीभेदे तन्त्रसा॰।

**त्रिकूर्चक** न॰ सुश्रुतोक्ते शस्त्रभेदे अर्द्धधारशब्दे ३७५ पृ॰ दृश्यम्। "विशेषेण बालवृद्धकुमारभीरुनारीणां राज्ञां राजपुत्राणाञ्च त्रिकूर्चकेन विस्रावयेत्" सुश्रु॰।

**त्रिकोण** त्रि॰ त्रयः कोणा यस्य। त्रिकोटियुक्ते १पदार्थे "विन्दुत्रिकोणवसुकोणदशारयुग्मम्" तन्त्रे श्रीचक्रोक्तौ। ज्योतिषोक्ते लग्नात् २नवमपञ्चमस्थाने न॰। "त्रिकोणं नवपञ्चमम्" दीपि॰। "त्रिकोणगान् गुरुश्चैव पश्यन् पूर्णफलप्रदः" ज्यो॰ त॰। ३योनौ शब्दकल्पतरुः। ४त्रिभुजे क्षेत्रभेदे न॰। क्षेत्रशब्दे २२८१ पृ॰ समत्रिकोणविषमत्रिकोणादिस्वरूपादिकमुक्तम्। ५कामरूपपीठभेदे "करतोयां समारभ्य यावद्दिक्करवासिनीम्। शतयोजनविस्तारं त्रिकोणं सर्वसिद्धिदम्" कामाख्यातन्त्रम्। त्रिकोणपदार्थाश्च कतिचित् कविकल्पलतायां संक्षिप्य दर्शिताः। "हलहरनेत्रकामाख्यावह्निमण्डलैकारवज्रशृङ्गाटशकटयोनिरूपाः"।

**त्रिकोणफल** न॰ त्रिकोणं फलमस्य। १शृङ्गाटके भावप्र॰। ६त॰। त्रिभुजक्षेत्रफले "लम्बगुणं भूम्यर्द्धं स्पष्टं त्रिभुजे फलं भवति" लीला॰। [काचारयवक्षारटङ्कणक्षारेषु।

**त्रिक्षार** न॰ त्रयाणां क्षाराणां समाहारः। मिलिते सर्जि-

**त्रिक्षुर** पु॰ त्रीणि क्षुराणीवाग्राण्यस्य। कोकिलाक्ष्यवृक्षे रत्ना॰।

**त्रिख** न॰ त्रिधा खमाकाशोऽवकाशः फलेऽत्र। त्रपुषे शब्दच॰।

**त्रिखट्व** न॰ तिसृणां खट्वानां समाहारः। खट्वात्रये। ततः वा ङीप्। तत्रार्थे स्त्री अमरः।

**त्रिखर्व** पु॰ सामवेदशाखाभेदाध्यायिनि "तामेतान्त्रिखर्वा उपासते तस्मात्ते स्पर्द्धमाना न व्रीयन्ते" ताण्ड्यब्रा॰२।८।३। "तामेतां दशसप्ताख्यां विष्टुतिं त्रिखर्वाः शाखिन उपासते प्रयुञ्जते" भाष्यम्।

**त्रिगङ्ग** अव्य॰ तिस्रो गङ्गा नद्यो यत्र बहुव्रीह्यर्थे "नदीभिश्च" पा॰ अव्ययी॰। १तीर्थभेदे। "सप्तगङ्गे त्रिगङ्गे च इन्द्रमार्गे च तर्पयन्। सुधां चैव लभेत् भोक्तुं यो नरो जायते पुनः" भा॰अनु॰ २५ अ॰।

**त्रिगण** त्रि॰ ६त॰। १त्रिवर्गे अमरटीकायां नीलकण्ठः "न बाधतेऽस्य त्रिगणः परस्परम्" किरा॰।

**त्रिगन्धक** न॰ त्रयाणां गन्धकद्रव्याणां समाहारः। १त्रिजातके त्रि॰ नैघण्टुपारस्करः। त्रिसुगन्धिकमप्यत्र। त्रिजातकशब्दे दृश्यम्।

**त्रिगम्भीर** पु॰ त्रिभिर्गम्भीरः। स्वरेण सत्त्वनाभिभ्यां त्रिगम्भीरः शिशुः शुभः" काशी॰ ११ अ॰ उक्ते शुभलक्षणयुक्ते "त्रिषु विपुलो गम्भीरस्त्रिष्वेव षडुन्नतश्चतुर्ह्रस्वः" इत्युपक्रमे "नाभिः स्वरः सत्त्वमिति प्रदिष्टं गम्भीरमेतत्त्रितयं नराणाम्" वृ॰ स॰ ६८ अ॰।